## इकोऽचि विभक्तौ । (७३/३२०)

इगन्तस्य नपुंसकस्याङ्गस्य अजादौ विभक्तौ [1]नुमागमो भवति । त्रपुणी । जतुनी । तुम्बुरुणी । त्रपुणे । जतुने । तुम्बुरुणे । इकः इति किम् ? कुण्डे । पीठे । अचि इति किम् ? उत्तरार्थम् । यद्येवम्, तत्रैव कर्तव्यम् ? इह तु करणस्य एतत् प्रयोजनम्, हे त्रपो इत्यत्र नुम् मा भूत् इति, ‘न ङिसम्बुद्धयोः’ (८.२.८/३५२) इति [2]नलोपप्रतिषेधः स्यात् । ननु च ‘न लुमताङ्गस्य’ (१.१.६३/२६३) इति [3]प्रत्ययलक्षणे प्रतिषिद्धे विभक्तिरेव नास्ति ? एतदेवाज्ग्रहणं [4]ज्ञापकं प्रत्ययलक्षणप्रतिषेधोऽत्र न भवति इति । तथा च सम्बुद्धिगुणः क्रियते । विभक्तौ इति किम् ? तौम्बुरवं चूर्णम् ।

इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम् ।

स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति ।

[5]रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि ।

नुड् वाच्य उत्तरार्थं तु इह किञ्चित् त्रपो इति (म. भा. ३.२६७) ॥

## तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य । (७४/३२१)

[6]तृतीयादिषु विभक्तिष्वजादिषु[7] भाषितपुंस्कम्[8] इगन्तं नपुंसकं गालवस्याचार्यस्य मतेन पुंवद् भवति । यथा पुंसि ह्रस्वनुमौ न भवतः, [9]तद्वदत्रापि न भवतः इत्यर्थः । ग्रामणीः ब्राह्मणः । ग्रामणि ब्राह्मणकुलम् । ग्रामण्या ब्राह्मणकुलेन, ग्रामणिना ब्राह्मणकुलेन । ग्रामण्ये ब्राह्मणकुलाय, ग्रामणिने ब्राह्मणकुलाय । ग्रामण्यो ब्राह्मणकुलात्, ग्रामणिनो ब्राह्मणकुलात् । ग्रामण्यो ब्राह्मणकुलस्य, ग्रामणिनो ब्राह्मणकुलस्य । ग्रामण्योर्ब्राह्मणकुलयोः, ग्रामणिनोर्ब्राह्मणकुलयोः । ग्रामण्यां ब्राह्मणकुलानाम्, नुमचिर (८.२.२४/२८० वा.) इति पूर्वविप्रतिषेधेन नुट्, ग्रामणीनां ब्राह्मणकुलानाम् । ग्रामण्यां ब्राह्मणकुले, ग्रामणिनि ब्राह्मणकुले । शुचिर्ब्राह्मणः । शुचि ब्राह्मणकुलम् । शुचये ब्राह्मणकुलाय, शुचिने ब्राह्मणकुलाय । शुचेर्ब्राह्मणकुलात्, शुचिनो ब्राह्मणकुलात् । शुचेर्ब्राह्मणकुलस्य, शुचिनो बाह्मणकुलस्य । शुच्योर्ब्राह्मणकुलयोः, शुचिनोर्ब्राह्मणकुलयोः । शुचौ ब्राह्मणकुले, शुचिनि ब्राह्मणकुले । तृतीयादिषु इति किम् ? ग्रामणिनी ब्राह्मणकुले । शुचिनी ब्राह्मणकुले । भाषितपुंस्कम् इति किम् ? त्रपुणे । जतुने ।

इह कस्मान्न भवति, पीलुर्वृक्षः, पीलु फलम्, पीलुने फलाय इति ? समानायामाकृतौ यद् भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते तस्य पुंवद्भावः । इह तु वृक्षाकृतिः प्रवृत्तिनिमित्तं पुंसि शब्दस्य, फलाकृतिर्नपुंसके । तदेतदेवं कथं भवति भाषितपुंस्कम् इति ? भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देन उच्यते, तद्योगादभिधेयमपि यद् नपुंसकं तदपि भाषितपुंस्कम् । तस्य प्रतिपादकं यच्छब्दरूपं तदपि भाषितपुंस्कम् इति । इकः इत्येव, कीलालपा ब्राह्मणः । कीलालपं बाह्मणकुलम् । कीलालपेन ब्राह्मणकुलेन । अचि इत्येव, ग्रामणिभ्यां ब्राह्मणकुलाभ्याम् ॥

---

1. परतः इत्यधिकम् क. 2. नकारलोप इ. 3. प्रत्ययलोपलक्षणे क. 4. ज्ञापयति क. 5. वायात्वं क. 6. इकोऽचि विभक्तौ इति वर्तते इत्यधिकम् क. 7. परतः इत्यधिकम् क. 8. यत् इत्यधिकम् क. 9. तथात्रापि क.